International Journal of Jyotish Research
(वेदचक्षु)

**ISSN:** 2456-4427
**Impact Factor:** RJIF: 5.11
Jyotish 2018; 3(2): 01-04
© 2018 Jyotish
www.jyotishajournal.com
Received: 01-05-2018
Accepted: 02-06-2018

**डॉ. शुभस्मितामिश्रः**
सहायकाचार्या, राष्ट्रिय संस्कृत संस्थानम्, जयपुर परिसरः, जयपुरम्, राजस्थान, भारत

**Correspondence**
**डॉ. शुभस्मितामिश्रः**
सहायकाचार्या, राष्ट्रिय संस्कृत संस्थानम्, जयपुर परिसरः, जयपुरम्, राजस्थान, भारत

# सूर्यचन्द्रवशादुत्पन्नयोगविचारः

**डॉ. शुभस्मितामिश्रः**

**प्रस्तावना**

पृथिव्यां स्थितचेतनप्राणिषु मानवः सर्वोत्कृष्ट वर्तते। मानवस्य सर्वोत्कृष्टतायाः कारणं बुद्धिः, मनः, आत्मा एव। सूर्यविषये वेदे उक्तं यत् "सूर्यः आत्मा जगतश्तस्थुकश्च" अर्थात् सूर्यः सम्पूर्णपृथ्वीवासीनां, चराचरजंगमादीनां सजीवनिर्जीवपदार्थानां च आत्मतत्त्वोत्पादकः, ऊष्मादायकः, शक्तिदायकः, गत्युत्पन्नकारकः, जीवनदायकश्च वर्तते। भारतीयज्योतिषशास्त्रे सूर्यः ग्रहेषु नृपसंज्ञकः, केन्द्रसंज्ञकः, उच्चसंज्ञकश्च वर्तते। एवमेव चन्द्रोऽपि ग्रहेषु नृपसंज्ञकः, मनसः कारकः, जीवनदायकश्च वर्तते। अग्निसोमात्मकं जगदिति अर्थात् सौरमण्डले अग्नेः प्रतीकः सूर्यस्तथा सोमतत्वस्य प्रतीको चन्द्रः वर्तते। संसारे जीवनं सूर्यचन्द्रादुत्पन्नः। सूर्यचन्द्रयोर्विना पृथिव्यां जीवनमसंभवमिति नव्यवैज्ञानिका अपि आमनन्ति यतोहि सूर्यप्रकाशात् पादपाः प्रकाशसंश्लेषणक्रियया स्वकीयं पोषणं कुर्वन्ति तथा चन्द्ररश्मिवशात् वृद्धिं प्राप्नुवन्ति। इदमेव कारणं वर्तते यत् आयुर्वेदे चन्द्रः औषधीनां पतिरिति उक्तः। सौरमण्डले सूर्यचन्द्रयोः महत्त्वं प्रभावं चावलोक्य प्राचीनज्योतिर्वैज्ञानिकाः ऋषयः ग्रहेषु चन्द्रसूर्ययोः प्राथम्यं स्वीकृतवन्तः। परीक्षणेन सिद्धं जातं यत् यदि जातकस्य जन्मांगे सूर्यचन्द्रौ प्रबलौ भवतस्तर्हि जातकस्य जीवनं सौभाग्ययुक्तं, सुखसमृद्धिर्युक्तमैश्वर्ययुक्तं च भवति। विशेषतः पुरूषस्य जन्मांगे प्रबलः सूर्यस्तथा स्त्रियाः जन्मांगे प्रबलश्चन्द्रः सुखसमृद्धिर्दायको भवति।

फलितज्योतिषे प्रायशः राजयोगाः केन्द्रत्रिकोणसम्बन्धेन समुत्पद्यन्ते। केन्द्रं विष्णुस्थानं त्रिकोणं तु लक्ष्मीस्थानं तयोः संयोगेन राजयोगस्योत्पतिर्जायते। यथोक्तं बृहत्पराशरहोराशास्त्रे [1] –

> विष्णुस्थानं स्मृतं केन्द्रं लक्ष्मीस्थानं त्रिकोणकम्।
> तयोरधीशसम्बन्धो राजयोगकरो नृणाम्।।

ज्योतिषशास्त्रे सौरमण्डलस्थसूर्यादीनां नवग्रहाणां संचारैः परस्परयोगैः नक्षत्रपुंजाश्रितयोगैश्च विविधशुभाशुभयोगाः समुत्पद्यन्ते। सापेक्षिककालखण्डस्य शुभाशुभत्वं शुभाशुभखगोलीयपिण्डयोगेन सम्भवति। यथा घृतमधुसंयोगेन गरलोत्पतिर्जायते तथैव ग्रहद्वययोगेन प्रभावविशेषस्योत्पतिर्जायते। ग्रहर्क्षाणां संचारानुरोधेन उदयास्तादिभिः परस्परयोगेन दृष्टिसंबन्धेन उच्चादिभिर्योगाः समुत्पद्यन्ते। स्थित्यन्तरेण अनेकविधयोगाः सन्ति। पराशरादिभिः प्राचीनाचार्यैः ग्रहाणां योगायोगेन राजयोगाः, धनयोगाः, निर्धनयोगाः, चक्रवर्तीयोगाः, विपरीतराजयोगादि बहुविधविशिष्टराजयोगाश्च प्रतिपादिताः मुकबधिरपंगुविकलांगान्धादियोगाः, दारिद्र्ययोगादिकथनपुरस्सर– मनेकानां दारिद्रयोगानामपि निरूपणं कृतम्। एवंविधयोगवशतः पुरूषो स्त्री वा कस्मिन् समये भाग्योदयमुपयास्यति, शरीरसौख्यं पूर्णत्वमेष्यति इत्यादयः विषयाः विचारणीयाः भवन्ति। परं जन्मांगे लग्नादिद्वादशभावाः, ग्रहाश्च महत्त्वपूर्णाः भवन्ति। जन्मांगगत सर्वं फलं विचारश्च लग्नसूर्यचन्द्राश्रिताः वर्तन्ते। ज्योतिर्वैज्ञानिकानामभिमतं वर्तते यत् चन्द्रः जातकस्य शरीरं लग्नं प्राणः वर्ततेऽतः सूर्यचन्द्रयोः विशेषविचारं कृत्वा यदि फलादेशः क्रियते तर्हि फलं सत्यं भवति। यस्मिन् भावे सूर्यचन्द्रौ भवतः तद् भावमपि लग्नं परिकल्प्य विशेषविचारः करणीयः इति शास्त्रस्याभिमतं वर्तते। यथोक्तम् [2] –

> चन्द्रलग्नं शरीरं स्यात् लग्नं स्यात् प्राणसंज्ञकम्।
> ते उभे संपरिक्ष्यैव सर्वं नाडीफलं स्मृतम्।।

सौरमण्डले सूर्यचन्द्रौ नृपसंज्ञकौ, बुधः राजकुमारः, कुजः सेनापतिः, गुरुशुक्रौ सचिवौ तथा शनैश्चरः सेवकरूच्यते। जन्मसमये यो ग्रहः सर्वाधिकबली भवति सः स्वकीयस्वरूपानुरूपं जातकं निर्माति। कालपुरूषस्य आत्मा रविः, मनः चन्द्रः, बलं भौमः, वाणी बुधः, ज्ञानसुखे गुरुः, मदः शुक्रस्तथा दुःखं शनि अस्ति। यथोक्तम् [3] –

राजा रविः शशधरश्च बुधः कुमारः सेनापतिः क्षितिसुतः सचिवौ सितेज्यौ।
भृत्यस्तथा तरणिजः सबला ग्रहाश्च कुर्वन्ति जन्मसमये निजमेव रूपम्।।
आत्मा रविः शीतकरस्तु चेतः सत्वं धराजः शशिजोऽथ वाणी।
ज्ञानं सुखं चेन्द्रगुरुर्मदश्च शुक्रः शनिः कालनरस्य दुःखम्।।

मानवः स्वजीवने वा कार्यक्षेत्रे तदेव सफलो भवति यदा सः आत्मबली वा मनोबली भवति। उक्तमपि "जगद् जीतं येन मनो जीतेन " अर्थात् आत्मा तथा मनः जीवनस्याधारस्तम्भौ। प्रायः जन्मांगे यदि सूर्यचन्द्रयोः स्थितिः सम्यक् भवति तर्हि जातकः समाजे लब्धप्रतिष्ठो उच्चपदं च प्राप्नोति। जन्मांगे चन्द्रस्य शुभाशुभस्थितिवशात् अनेके राजयोगाः समुत्पद्यन्ते यथा – अधियोगः, सुनफायोगः, अनफायोगः, दुरधरायोगस्तथा केमद्रुमयोगः इत्यादयः। एवमेव सूर्यस्यापि शुभाशुभस्थितिवशात् वेशि–वाशि–उभयचरी–
योगाः भवन्ति।

**चन्द्रकृत योगाः**

**अधियोगः**

अधियोगविचारे पराशरेण उक्तं यथा –

इन्दोः षष्ठाष्टमदगैरधियोगः शुभग्रहै :।
बलानुसारतस्तत्र नृपोऽमात्यो बलाधिपः।।

अर्थात् चन्द्रात् षष्ठसप्तमद्वादशस्थानेषु शुभग्रहाः भवन्ति तर्हि अधियोगः भवति। अधियोगे उत्पन्नजातकः ग्रहाणां बलानुसारं नृपः, आमात्यस्तथा सेनापतिर्भवति। जातकपारिजातेऽपि उक्तं यत् चन्द्रस्थानात् सप्तमषष्ठाष्टमभावेषु शुभग्रहैः बुधगुरुशुक्रैः यथासम्भवमुपगतैः अधियोगः स्यात्। अस्मिनधियोगे जातो राजा, मन्त्री, सेनापतिर्वा भवति।
सूर्यात् केन्द्रगते चन्द्रे अधमो योगस्तस्मिन् विनयवित्तज्ञानधीनैपुण्यानि अधमानि भवन्ति। सूर्यात् पणफरे गतवति चन्द्रे समो योगस्तस्मिन् विनयवित्तज्ञानधीनैपुण्यानि समं वाच्यम्। सूर्यात् आपोक्लिमे गते चन्द्रे वरिष्ठो योगस्तस्मिन् विनयवित्तज्ञानधीनैपुण्यानि वरिष्ठं वाच्यमिति।

**गजकेसरीयोगः**

चन्द्रात् केन्द्रस्थिते बृहस्पतौ सति गजकेसरी योगो भवति। चन्द्रे नीचास्तहीनैः शुक्रगुरुबुधाः नीचं गताः अस्तमिताश्च न भवेयुस्तैः दृष्टे सति गजकेसरीयोगः स्यात्। गजकेसरीयोगोत्पन्नजातकः तेजस्वी, धनधान्यवान्, मेधावी, गुणसम्पन्नस्तथा राजप्रियो भवति।

**सुनफानफादुरुधराकेमद्रुमयोगाः**

चन्द्रात् द्वितीयस्थाने सूर्येतरग्रहयुक्ते सुनफा नाम योगो भवति। चन्द्रात् द्वादशे स्थाने सूर्येतरग्रहयुक्ते अनफा नाम योगो भवति। चन्द्रात् द्वितीये द्वादशे च भावे सूर्येतरखेचरसंयुते दुरधुरा योगो भवति। चन्द्राद् द्वितीये द्वादसे च स्थाने शून्ये सति केमद्रुमयोगो भवति। लग्नस्थिते वा सप्तमस्थे चन्द्रे गुरुदृष्टया विहीने सति केमद्रुमो योगो भवति। यदि सर्वे ग्रहाः अष्टकवर्गेऽल्पशुभचिह्नकास्तथा बलहीनाश्च भवेयुस्तेऽपि केमद्रुमयोगफलदा भवन्ति। यथोक्तं जातकपारिजाते –

द्वितीये द्वादशे पार्श्वे द्वये खेचरसंयुते।
शीतांशोः सुनफायोगस्त्वनफानाम कीर्तितः।।
योगो धुरन्धुराख्यः स्याद्विना सर्वत्र भास्करम्।
एतद्योगत्रयाभावे केमद्रुमफलं वदेत्।।
लग्नस्थिते हिमकरे यदि वा मदस्थे केमद्रुमो भवति जीवदृशा विहीने।
अत्यल्पबिन्दुसहिता यदि खेचरेन्द्राः केमद्रुयोगफलदा विबलाश्च सर्वे।।

चन्द्राद् द्वितीये वा द्वादशे सूर्यो भवतु वा न भवतु किन्तु न स योगकारको भवति। भौमादयः पंचग्रहाः अर्थात् मंगल–बुध–गुरु–शुक्र–शनैश्चराः ग्रहाः एकैकाः सम्मिलिता वा चन्द्रात् द्वितीये सुनफायोगकराः, द्वादशे अनफायोगकराः भवन्ति। एवं पंचभिर्ग्रहैः एकत्रिंशत् (31) भेदाः अनफाः सुनफाश्च भवन्ति। एवमेव चन्द्राद् द्वितीयद्वादशगतैः पंचभिर्ग्रहैः एकाकिभिः सम्मिलितैश्चाशीत्यधिकशत (180) भेदा दुरधुराः ज्ञेयाः। यथोक्तं बृहज्जातके –

त्रिंशत्सरूपाः सुनफानफाख्याः षष्ठित्रयं दौरुधरे प्रभेदाः।
इच्छाविकल्पैः क्रमशोऽभिनीय नीते निवृत्तिः पुनरन्यनीतिः।।

सूर्यसहिते चन्द्रे नीचगतग्रहेण दृष्टे पापग्रहनवांशे विद्यमाने सति जातकः दरिद्रयोगसंज्ञकं केमद्रुमयोगं प्राप्नोति। रात्रिसमये जन्मनि लग्नगतकृष्णपक्षीयक्षीणचन्द्रात् अष्टमभावे पापग्रहेण दृष्टे, पापग्रहेण युते सति दरिद्रयोगो भवति।
राह्वादिपापग्रहैः पीडिते चन्द्रे पापेक्षिते सति जातकः शीघ्रमेव दरिद्रयोगमेति। लग्नात् वा चन्द्रात् चतुर्षु केन्देषु पापग्रहयुक्ते सति जातकः शीघ्रमेव दरिद्रयोगमेति।
चन्द्रः राह्वाद्यशुभग्रहेण पीडितः स्यात् वा ग्रहयुद्धे पराजितशुभग्रहेण अर्थात् बुधगुरुशुक्राणामन्यतमस्य दृष्टया युक्ते सति जातकः दरिद्रो भवति।
यदि चन्द्रः नीचराशौ स्थितः स्यात् वा शत्रुग्रहेण दृष्टः युक्तो वा स्यात् अथवा शत्रुग्रहस्य राशौ वा वर्गे स्यादथवा तुलाराशौ भवेत्तर्हि जातकः दरिद्रो भवति।
नीचराशेर्वा शत्रुराशेर्वर्गगते चन्द्रे यदि केन्द्रे वा कोणगे अर्थात् लग्नात् प्रथमचतुर्थसप्तमदशमपंचमनवमभावेषु कुत्रापि स्थितः स्यात्तथा चन्द्रात् द्वादशषष्ठाष्टमभावेषु कुत्रापि गुरोः स्थितिर्भवेत्तर्हि जातकः दरिद्रो भवति। पापग्रहनवांशे विद्यमाने शत्रुग्रहेण वीक्षिते चरगृहगते चन्द्रे अर्थात् मेषकर्कतुलामकराणामन्यतमराशौ गते चन्द्रे अथवा चरांशे विद्यमाने गुरोः दृष्टयाः वर्जिते सति जातकः अतिदरिद्रो भवति।[1]
शनिशुक्रौ नीचराशेर्वा शत्रुराशेर्वा पापग्रहस्य वर्गे यातौ, अन्योन्यदृष्टौ शनिना शुक्रः, शुक्रेण शनिश्च दृष्टो भवेत् वा तौ एकराशिगतौ भवेतां तदा राजवंशे जातोऽपि केमद्रुमयोगमेति।[2]
यदि पापग्रहेण युक्तः चन्द्रः पापग्रहस्य भवने वा पापग्रहस्य नवांशे स्थितः स्यात् वा जातकस्य जन्मः रात्रौ भवेत्तथा निर्बलचन्द्रः दशमेशेन दृष्टः स्यात्तर्हि केमद्रुमयोगो भवति। नीचराशिनवांशे स्थितः पापग्रहेण युक्तः चन्द्रः भाग्येशेन दृष्टः स्यात् वा रात्रौ जन्मनि स्वनीचराशिगतक्षीणचन्द्रः स्यात्तर्हि केमद्रुमयोगो भवति।[3]
जन्मांगे यदि केमद्रुमयोगस्य लक्षणं घटते परं केन्द्रवर्तिचन्द्रशुक्रौ गुरुणा दृष्टः स्यात्तर्हि केमद्रुमयोगः न भवति। शुभग्रहेण युक्तः वा शुभग्रहयोर्मध्ये स्थितः चन्द्रः गुरुणा दृष्टो भवति चेत् केमद्रुमयोगो न भवति।
अतिमित्रस्य ग्रहस्य भवने स्थितः वा स्वकीयोच्चराशौ स्थितः वा स्वकीयराशौ स्थितः वा स्वकीयनवांशे स्थितः चन्द्रः गुरुणा दृष्ट स्यात्तर्हि केमद्रुमयोगो न भवति अर्थात् केमद्रुमयोगस्य भंगः जायते।
शुभग्रहेण युक्तः पूर्णचन्द्रः लग्ने स्थितः स्यादथवा दशमभावे स्थितः उच्चराशिगतचन्द्रः गुरुणा दृष्टः स्यात्तर्हि केमद्रुमयोगो न भवति।[4]
यदि जन्मांगे केमद्रुमयोगो भवति चेत् जन्मांगस्थितराजयोगोऽपि निष्फलं जायते।
सुनफायोगोत्पन्नः जातकः स्वकीयपरिश्रमेण धनार्जनं कृत्वा धनाढयो भवति अथवा राजा सदृशः धनाढयः, विख्यातस्तथा यशवान् भवति।
अनफायोगोत्पन्नजातकस्याज्ञायाः सर्वे जनाः पालनं कुर्वन्ति। जातकः रोगरहितः, शीलयुक्तः, विख्यातकीर्तियुक्तः, शब्दस्पर्शरूपरसगन्धादि विषयानां भोक्ता, सुन्दरशरीरयुक्तस्तथा दुःखरहितो भवति।
दुरुधरायोगोत्पन्नजातकः विविधभोगानां भोक्त, सुखभागी, धनवाहनेन युक्तः, त्यागी, सुन्दरभृत्ययुक्तो जातको भवति।

केमद्रुमयोगोत्पन्नजातकः यदि नृपस्य कुलोत्पन्नो भवति तथापि मलिनः, दुखितः, नीचः, निर्धनस्तथा खलो भवति।[5]

**कुजादिकृतसुनफा–अनफा–दुरुधरायोगफलानि**

चन्द्रात् द्वितीयस्थाने कुजः स्यात्तर्हि जातकः उग्रबुद्धियुक्तः, हिंसकः, साहसिकः, धनी, पराक्रमी क्रोधीस्तथा नृपः भवति।

चन्द्रात् द्वितीयस्थाने बुधः स्यात्तर्हि जातकः वेदशास्त्रस्य विद्वान्, गानविद्यायां चतुरः, सुन्दरशरीरयुक्तः, मनस्वी, सर्वेषां हितचिन्तकः, मधुरभाषी, धर्मात्मा च भवति।

चन्द्रात् द्वितीयस्थाने गुरुः स्यात्तर्हि जातकः विद्यासु प्रवीणः, श्रीमान्, कुटुम्बसम्पन्नः, नृपस्य प्रियस्तथा नृपसदृशः यशस्वी भवति।

चन्द्रात् द्वितीयस्थाने शुक्रः स्यात्तर्हि जातकः पराक्रमी, स्त्रीधनयुक्तः, भूमियुक्तः, कर्मशीलः, धनाढ्यः, चतुष्पदैर्युक्तस्तथा राजलक्ष्मीर्युक्तो भवति।

चन्द्रात् द्वितीयस्थाने शनि स्यात्तर्हि जातकः ग्रामनिवासी, सर्वत्रपूजितः, धनवान्, बुद्धिमान् तथा सर्वेषु कार्येषु निष्णातश्च भवति।[6]

चन्द्रात् द्वादशस्थाने कुजः स्यात्तर्हि जातकः मानी, युद्धे पराक्रमी, क्रोधी, धृष्टः, चौराणामधिपतिः, धीरस्तथा स्वकीयशरीरस्य रक्षको भवति।

चन्द्रात् द्वादशस्थाने बुधः स्यात्तर्हि जातकः गान्धर्वविद्यायाः निष्णातः, लेखकः, चतुरः, कविः, वक्ता, सुन्दरदेहयुक्तः, यशस्वी तथा राजपूज्यो भवति।

चन्द्रात् द्वादशस्थाने गुरुः स्यात्तर्हि जातकः राजपूज्यः बुद्धिमान्, गाम्भीर्ययुक्तः, सत्वगुणी, पवित्राचरणयुक्तः, समाजेषु उत्तमस्थानयुक्तस्तथा धनाढयो भवति।

चन्द्रात् द्वादशस्थाने शुक्रः स्यात्तर्हि जातकः युवतीजनैः साकं विलासकर्ता, पश्वादिधनैर्युक्तः, बुद्धिमान्, धनधान्यैः पूर्णो भवति।

चन्द्रात् द्वादशस्थाने शनिः स्यात्तर्हि जातकः विस्तीर्णबाहुयुक्तः, गुणवान्, नेता, पश्वादिधनैर्युक्तः, वचनग्राही तथा दुष्टा स्त्रीयुक्तो भवति।[7]

यदि जन्मसमये बुधकुजयोर्मध्ये चन्द्रः स्यात्तर्हि जातकः असत्यवादी, गुणवान्, निपुणः, शठः, दयायुक्तः, लोभयुक्तस्तथा वृद्धास्त्रीषु आसक्तो भवति।

यदि जन्मसमये गुरुकुजयोर्मध्ये चन्द्रः स्यात्तर्हि जातकः कर्मठः, यशस्वी, शत्रुभिर्पीडितस्तथा सर्वदा स्वकीयगृहे तिष्ठति।

यदि जन्मसमये शुक्रकुजयोर्मध्ये चन्द्रः स्यात्तर्हि जातकः व्यायामकर्मसु निपुणः, सुन्दरः, कामुकः, क्रूरस्वभावः, हृष्टः, धनी तथा भयेन शीलरहितो भवति।

यदि जन्मसमये शनिकुजयोर्मध्ये चन्द्रः स्यात्तर्हि जातकः निन्दितस्त्रीरतः, क्रोधी, धनवान्, पिशुनः, बहुशत्रुयुक्तस्तथा अधीरो भवति।

यदि जन्मसमये बृहस्पतिबुधयोर्मध्ये चन्द्रः स्यात्तर्हि जातकः धर्मात्मा, शास्त्रज्ञः, वाचालः, श्रेष्ठकविः, सज्जनैर्युक्तस्तथा यशस्वी भवति।

यदि जन्मसमये बुधशुक्रयोर्मध्ये चन्द्रः स्यात्तर्हि जातकः सर्वदा नृत्यगानेषु मग्नः, सुन्दररूपवान्, प्रियवक्ता, सुन्दरशरीरयुक्तः, सुन्दरबुद्धियुक्तस्तथा साहसीकप्रकृतियुक्तो भवति।

यदि जन्मसमये शनिबुधयोर्मध्ये चन्द्रः स्यात्तर्हि जातकः अनेक देशेषु पूज्यः, विद्यायुक्तः, धनयुक्तस्तथा बन्धूनां बैरी भवति।

यदि जन्मसमये गुरुशुक्रयोर्मध्ये चन्द्रः स्यात्तर्हि जातकः नृपसदृशः सम्पूर्णराज्येषु पूज्यः, श्रीमान्, नीतिज्ञः, पराक्रमी, विख्यातस्तथा शुद्धचित्तवान् भवति।

यदि जन्मसमये शनिबृहस्पत्योर्मध्ये चन्द्रः स्यात्तर्हि जातकः सुखी, विनय–विज्ञान–विद्या–रूप–गुणैर्युक्तः, धनी तथा अन्येषां कृते शान्तिदायको भवति।

यदि जन्मसमये शनिशुक्रयोर्मध्ये चन्द्रः स्यात्तर्हि जातकः वृद्धानामाचारैर्युक्तः, कुलीनः, गुणहीनस्त्रीयाः स्वामी, धनधान्ययुक्तस्तथा राजप्रियो भवति।

दुरुधरायोगकारकग्रहाः यदि स्वकीयोच्चराशौ, स्वकीयराशौ, स्वकीयनवांशे वा स्वमित्रगृहे भवेयुस्तर्हि नियतफलस्य प्राप्तिर्भवति अन्यथा फलस्य हानिर्जायते। चन्द्रः राहुणा वा केतुना युक्तो भवेत् वा चन्द्रात् द्वादशभावे राहुर्भवेत् वा दुरुधरायोगकारकग्रहः नीच्चराशौ वा अस्तंगतो भवेत्तर्हि मिश्रफलं जातकः प्राप्नोति।[8]

**शकटयोगः**

चन्द्रात् षष्ठे वा अष्टमे भावे गुरुः स्यात्तथा लग्नात् केन्द्रे न स्यात्तर्हि शकटसंज्ञकयोगो भवति। शकटयोगोत्पन्नजातकः यदि राजकुलोत्पन्नो भवति तथापि दरिद्रत्वं प्राप्नोति। जातकः आजीवनं कष्टयुक्तः, सन्तप्तस्तथा नृपस्य अप्रियो भवति। जातकपारिजाते यथोक्तम् –

षष्ठाष्टमगतश्चन्द्रात्सुरराजपुरोहितः।
केन्द्रादन्यगतो लग्नाद्योगः शकटसंज्ञितः।।
अपि राजकुले जातो निःस्वः शकटयोगजः।
क्लेशायासवशान्नित्यं सन्तप्तो नृपविप्रियः।।

**अमलायोगः**

यदि जन्मांगे लग्नात् वा चन्द्रात् दशमस्थाने शुभग्रहाणां स्थितिवशात् अमलासंज्ञकयोगो भवति। यदि जन्मांगे चन्द्रात् दशमभावे शुभग्रहः स्यात्तर्हि जातकस्य कीर्तिः चतुर्दिगं व्याप्तं भवति तथा आजीवनमक्षुण्णधनं तिष्ठति। अमलायोगे उत्पन्नस्य जातकस्य कीर्तिः यावत् चन्द्रः आकाशे तिष्ठति तावत् पर्यन्तं स्थिरं भवति। स जातकः राजपूज्यः, महाभोगी, दानी, बन्धुप्रियः, परोपकारी तथा गुणवान् भवति।[9]

**सूर्यकृतराजयोगाः**

सूर्यात् द्वादशस्थाने ग्रहो भवेत्तर्हि वासीयोगः, सूर्यात् द्वितीयस्थाने ग्रहो भवेत्तर्हि वेशियोगस्तथा द्वितीयद्वादशस्थाने ग्रहौ भवेतां तर्हि उभयचरीयोगो भवति। एते योगकारकाः ग्रहाः यदि स्वगृही, मित्रगृही वा उच्चस्थानीयो भवेत्तर्हि जातकः धनधान्ययुक्तः, सुखैश्वर्ययुक्तस्तथा राजतुल्यो भवति। यथोक्तं जातकपारिजाते–

व्ययधनयुतखेटैर्वासिवेशी
दिनेशादुभयचरिकयोगश्चोभयस्थानसंस्थैः।
निजगृहसुहृदुच्चस्थानयातैश्च जाता बहुधनसुखयुक्ता राजतुल्या भवन्ति।।

यस्य जातकस्य जन्मः शुभग्रहयुक्तवेशियोगे स्यात् सः जातकः सुशीलः, वक्ता, धनी, अभयस्तथा शत्रुणां निहन्ता भवति। यदि पापग्रहेण युक्तवेशियोगे जातकस्य जन्मः भवति तदा जातकः दुष्टजनसेवकः, पापात्मा, धनेन सुखेन च हीनो भवति।

यदि शुभग्रहयुक्तवासियोगे जातकस्य जन्मो भवति तर्हि जातकः चतुरः, दानकर्ता, विद्वान्, सदाप्रसन्नचित्तः, परमसुखी, यशस्वी तथा बलवान् भवति। एवमेव यदि पापग्रहेण युक्तवासियोगे जातकस्य जन्मो भवति तर्हि जातकः विदेशे वासकर्ता, अत्यन्तमूर्खः, कामातुरः, वधकर्ता अर्थात् सर्वदा वधकर्मणि निरतास्तथा विकृतमुखयुक्तो भवति।

शुभग्रहयुक्तोभयचरियोगे जातकस्य जन्मो भवति तर्हि जातकः पुरूषेषु श्रेष्ठः, नृपसदृशः, धन–सुख–शील– दयादिगुणैर्युक्तस्तथा सहृदययुक्तो भवति। एवमेव पापग्रहयुक्तोभयचरियोगे जातकस्य जन्मः भवति तर्हि जातकः पापकर्मणिरतः, रोगी, परकर्मरतस्तथा दरिद्रो भवति।[10]

**भास्करयोगः**

यदि सूर्यात् द्वितीयस्थाने बुधः, बुधात् एकादशस्थाने चन्द्रः, चन्द्रात् पंचमनवमस्थानयोर्मध्ये बृहस्पतिः भवेत्तर्हि भास्करयोगो भवति। भास्करयोगे उत्पन्नजातकः पराक्रमी, प्रभुसदृशः अर्थात् नृपसदृशः,

शास्त्रार्थवित्, रूपवान्, गान्धर्वविद्यायाः ज्ञाता, धनी, गणितज्ञः, धीरस्तथा सर्वकर्मसु समर्थो भवति। यथोक्तं जातकपारिजाते–

भानोरर्थगते बुधे शशिसुताल्लाभस्थितश्चन्द्रमा–
श्चन्द्रात्कोणगतः पुरन्दरगुरुर्योगस्तदा भास्करः।
शूरो भास्करयोगजः प्रभुसमः शास्त्रार्थविद्रूपवान्
गान्धर्वश्रुतिवित्तवान् गणितविद्धीरः समर्थो भवेत्।।

**इन्द्रयोगः**

यदि चन्द्रात् तृतीयस्थाने कुजः, कुजात् सप्तमस्थाने शनिः, शनितः सप्तमस्थाने शुक्रस्तथा शुक्रात् सप्तमस्थाने बृहस्पतिः स्यात्तर्हि इन्द्रसंज्ञकयोगो भवति। इन्द्रसंज्ञकयोगे उत्पन्नजातकः विख्यातः, शीलवान्, गुणवान्, राजा वा राजासदृशः धनधान्यैश्वर्ययुक्तः, वाचालः, अनेक प्रकारस्य धन–भूषण–यश–रूप–प्रतापैश्च युक्तो भवति।[11]

**मरुद्योगः**

यदि शुक्रात् पंचमस्थाने वा नवमस्थाने बृहस्पतिः स्यात्, बृहस्पतितः पंचमस्थाने चन्द्रमा स्यात्, चन्द्रात् प्रथम–चतुर्थ–सप्तम–दशमस्थानेषु कुत्रापि सूर्यो भवेत्तर्हि मरुतसंज्ञकयोगो भवति। मरुतयोगे उत्पन्नः जातकः वाचालः, विशालहृदययुक्तः, स्थूलोदरयुक्तः, शास्त्राणां ज्ञाता, धनसम्पन्नः, क्रयविक्रयकर्मणि निपुणः, राजा वा राजासदृशः धनधान्यैश्वर्ययुक्तो भवति।[12]

**बुधयोगः**

यदि लग्ने गुरुः स्यात्तथा बृहस्पतितः प्रथम – चतुर्थ – सप्तम – दशमस्थानेषु कुत्रापि चन्द्रो भवेत्। चन्द्रात् द्वितीयस्थाने राहुः स्यात्। पराक्रमभावात् तृतीयस्थाने सूर्यकुजौ भवेतां तर्हि बुधयोगो भवति। बुधयोगे उत्पन्नः जातकः राजश्रीभिर्युक्तः, विशेषबली, विख्यातनामा, शास्त्रज्ञाता, व्यापारकर्मणि निपुणः, बुद्धिमान् तथा शत्रुरहितो भवति । यथोक्तं जातकपारिजाते –

लग्नेढ्यो गुरुकेन्द्रगो हिमकरश्चन्द्रादहिर्वित्तगः
सौर्यस्थानगतौ च भानुरुधिरौ योगो बुधः कीर्तितः।
राजश्रीबुधयोगजोऽतुलबलप्रख्यातनामा विदुः
शास्त्रज्ञानकरक्रियासु चतुरो धीमानशत्रुर्भवेत्।।[13]

जन्मसमये वृषलग्ने चन्द्रः स्यात्तथा चन्द्रोपरि षड्ग्रहाणां दृष्टिर्भवति चेत् जातकः बाल्यकाले एव नृपो भवति। यदि कश्चिदेको ग्रहः स्वकीयोच्चराशौ भवेत्तथा अन्ये ग्रहाः स्वमित्रक्षेत्रे वा स्वक्षेत्रे भवेयुस्तर्हि जातकस्य भाग्यं राजासदृशो भवति।[14]
जन्मसमये बृहस्पतिः स्ववर्गोत्तमराशौ वा पुष्करांशे चन्द्रकुजाभ्यां सहितो भवति तर्हि जातकः नृपो भवति। पूर्णचन्द्रः शुभग्रहेण युक्तो दृष्टो वा दशमभावे भवेत्तर्हि जातकः नृपो भवति।[15]
जन्मसमये गुरुशुक्राभ्यां युक्तः चन्द्रः धनुराशौ , बुधः लग्ने , कुजः कन्याराशौ तथा मकरराशेः शनिः चतुर्थभावे भवेत्तर्हि जातकः अत्यन्तबलयुक्तः नृपेषु पूज्यो भवति।[16]
जन्मसमये बुध–चन्द्र–कुज–शनैश्चराः क्रमशः कन्या – मीन – कर्क– धनु–मकरराशिषु स्थिताः स्युस्तर्हि जातकः नृपो भवति। यदि पूर्णबली चन्द्रः मीनराशेः लग्ने भवेत्तथा कुजः मकरराशौ एवं शनिः कुम्भराशौ भवेत्तर्हि जातकः नृपो भवति।[17]
जन्मसमये चन्द्रः लग्नेशं विहाय अन्यग्रहैर्युक्तो भवेत्तथा शुक्र–गृरु–बुधैर्दृष्टो भवेत्तर्हि जातकः नृपो भवति। यदि गुरु–शुक्र–कुजाः वर्गोत्तमांशे भवेयुस्तथा पापग्रहाः केन्द्रे न भवेयुस्तर्हि जातकः नृपो भवति।[18]
धनुराशेः अर्धांशे सूर्यचन्द्रौ भवेतां तथा मकरलग्ने अतिबलवान् शनिः एवं कुजः स्वकीयोच्चराशौ भवेत्तर्हि जातकः शक्तिसम्पन्ननृपो भवति। यदि जन्मसमये चन्द्रादुपचयस्थानेषु लग्नेशः स्यात्तथा शुभग्रहः शुभराशेः नवांशे स्थित्वा केन्द्रे भवेत् एवं पापग्रहाः बलरहिताः स्युस्तर्हि जातकः नृपो भवति।
जन्मसमये उच्चराशौ गम्यमानः सूर्यः त्रिकोणे स्यात्। चन्द्रः गुरुश्च कर्कराशौ भवेतां तर्हि जातकः रत्नादिभिर्युक्तः सम्पूर्णपृथिव्याः अधिपो भवति।
यस्य जन्मसमये सूर्यः स्वकीयमूलत्रिकोणराशौ वा उच्चराशौ भवेत्तथा रवि–शुक्र–बुधाः स्वस्वनवांशे स्थित्वा चन्द्रात् तृतीय–षष्ठ–अष्टमभावेषु स्युस्तर्हि जातकः नृपो भवति।[19]
यस्य जन्मसमये सूर्यबुधौ चतुर्थभावे, शनिचन्द्रौ दशमभावे तथा कुजः लग्ने भवेत्तर्हि जातकः नृपो भवति। यदि जन्मसमये अस्तंगतबुधः सूर्येण साकं मिथुनराशौ अथवा कन्याराशौ भवेत्तर्हि जातकः सर्वशास्त्रविशारदो भवति । लग्नं विहाय केन्द्रेषु स्थितः चन्द्रः गुरुशुक्राभ्यां दृष्टो भवति तदा जातकः नृपो भवति।
वस्तुतः जन्मसमये सूर्यचन्दयोः स्थितिः यदि दृढ़ो भवति तर्हि जातकः सर्वगुणसम्पन्नो भवति। अतएव जन्मांगे सर्वप्रथमः सूर्यचन्द्रयोः स्थितिं विचार्य फलादेशः कर्तव्यः।

**संदर्भ**


1. जातकपारिजात, राजयोगाध्याय, श्लोक 74–77,
2. जातकपारिजात, राजयोगाध्याय, श्लोक 78,
3. जातकपारिजात, राजयोगाध्याय, श्लोक 79,
4. जातकपारिजात, राजयोगाध्याय, श्लोक 80–81,
5. जातकपारिजात, राजयोगाध्याय, श्लोक 84–85,
6. जातकपारिजात, राजयोगाध्याय, श्लोक 86–90,
7. जातकपारिजात, राजयोगाध्याय, श्लोक 91–95,
8. जातकपारिजात, राजयोगाध्याय, श्लोक 96–107,
9. जातकपारिजात, राजयोगाध्याय, श्लोक 118–120,
10. जातकपारिजात, राजयोगाध्याय, श्लोक 125–127,
11. जातकपारिजात, राजयोगाध्याय, श्लोक 68,
12. जातकपारिजात, राजयोगाध्याय, श्लोक 69,
13. जातकपारिजात, राजयोगाध्याय, श्लोक 70,
14. जातकपारिजात, राजयोगाध्याय, श्लोक 24,
15. जातकपारिजात, राजयोगाध्याय, श्लोक 25,
16. जातकपारिजात, राजयोगाध्याय, श्लोक 26,
17. जातकपारिजात, राजयोगाध्याय, श्लोक 27,
18. जातकपारिजात, राजयोगाध्याय, श्लोक 29,
19. जातकपारिजात, राजयोगाध्याय, श्लोक 31–34,